# Dashopanishatsara ShrirAmabhadra Stotram

# दशोपनिषत्सार श्रीरामभद्रस्तोत्रम्

## Document Information

Text title : Dashopanishatsara ShrirAmabhadra Stotram

File name : dashopaniShatsArashrIrAmabhadrastotram.itx

Category : raama, shrIdharasvAmI, upanishhat

Location : doc_raama

Author : Shridharasvami

Transliterated by : Sonali Upendra Dasare

Description/comments : shrIdharasvAmI stotraratnAkara

Acknowledge-Permission: https://shridharamrut.com

Latest update : November 3, 2022

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 22, 2022

*sanskritdocuments.org*

# दशोपनिषत्सार श्रीरामभद्रस्तोत्रम्

(उपनिषद्पठणफलश्रुतिः)
(शार्दूलविक्रीडितवृत्तम्)
श्रीमद्रामपदारविन्दमधु ये भृङ्गाः सरागा अमी
सेवन्ते सनकाः शुकादिमुनयस्तेषां न काचित्स्पृहा ।
श्रीमद्रामपदारविन्दमधुनो जानन्ति वै ते रसं
तत्स्वादात्परसौख्यदा भवति या सा स्यात्स्थितिर्नः सदा ॥ १॥

ईशावास्यमिदं जगत्भवति भो जीवाः सुखान्वेषकाः
नास्त्यस्मिन् सुखलेश इत्युत इह ब्रूते श्रुतिर्मा गृधः ।
भुञ्जीथा इतरां च रामपदवीं त्यक्तेन तेनाधुना
मोहो नास्ति न शोक इत्यपि भवेदेकात्मतादर्शने ॥ २॥

शिष्यः पृच्छति केन खानि च मनः प्राणा गुरो चेशिताः
यच्छ्रोत्रं श्रवणस्य वाक्च वचसश्चित्तस्य चेतोपि तत् ।
चक्षुर्गच्छति नो मनो न च वचो यत्रास्ति तत्को वदेत्
एतत्ते प्रभुरामरूपमगुणं यक्षात्मकं सर्वभृत् ॥ ३॥

श्रेयः प्रेय इति द्वयं खलु तयोस्तच्छ्रेय एवाभयं
धीरो यस्तु विरक्तचित्तविलयसन्धन्यः कृती चात्मवित् ।
सूर्याचन्द्रमसौ न यत्र हुतभुग् रामस्य तस्मिन् पदे
शुद्धे शुद्धजलं यथा भवति सः स्वात्मैव वक्ति श्रुतिः ॥ ४॥

तं वेद्यं पुरुषं हि वेद न परं वेद्यं न तन्मृत्युभिः
योऽस्यामेवतनौ विभाति सततं शुभ्रो भवत्यक्षरः ।
यज्ज्ञात्वा मुदमश्नुतेऽत्र सकलं भद्रं च सर्वज्ञतां
तच्छ्रीरामपदस्वरूपममलं ज्ञेयं च गेयं पुनः ॥ ५॥

यद्ज्ञानाद्विदितं जगत्तदविकृद्धामस्वरूपं स्वयं
विज्ञाय स्वगुरोर्मुखात्परमितो भिन्नं न वेत्ति क्वचित् ।

सिन्धुं प्राप्य यथा न मुञ्चति नदी विद्वान परं विन्दते
यो वै तत्परमं च वेद सततं ब्रह्मैव स ब्रह्मवित् ॥ ६॥

ओङ्कारं व्यभजच्चश्रुतिर्वदति तदभुतं भविष्यद्भवत्
जीवेशौ च विभावयत्यपि पुनर्ब्रूते तयोरेकताम् ।
यद्ज्ञात्वा नितरामभिन्नपदवीं प्राप्नोत्यमात्रां शिवां
शुद्धं तुयरि मदं स्फुटं परिमिति श्रीरामभद्रोव्ययः ॥ ७॥

संसारस्य च रेरिवा मम तु या कीर्तिर्गिरेरुन्नता
यतुर्ध्वं जगतोऽस्य मूलमिति तद् ब्रह्मात्ममद्रूपकम् ।
यज्ज्ञात्वा स्वमृतं परं विभुरहं ब्रूते त्रिशङ्कुर्यतः
तच्छ्रीरामप्रदारविन्दभजने किं वा भवेद्दुर्घटम् ॥ ८॥

आनन्दात्समुदीर्य यान्बहुविधान्बाह्यान्परां श्चापरान्
सत्यं ज्ञानमनन्तमक्षरमहं यो वेद निष्कामतः ।
सर्वान् सोऽश्नुत इत्यपि श्रुतिरहो बूते परं विन्दते
तत् श्री रामपदं भजध्वमधुना ब्रह्मैव यन्निभयम् ॥ ९॥

यत्सृङ्नऋष्टस्थितिपालनं विदलनं धृत्वापि साक्षी स्वयं
अन्नं प्राणमनोमतिभ्य इति तच्चानन्दकोशागतिम ।
यन्मायारहितं चकास्ति सततं कार्यं न यस्मिन् क्वचित्
तच्छ्री रामपदं भजामि नितरामानन्दमात्रं शिवम् ॥ १०॥

येनेदं मन इन्न्द्रियाणि च तथा प्राणा जगज्जायते
जन्मादिष्वपि जाग्रदादिषु तथा यज्ज्ञापकं विस्फुटम् ।
यस्मिन्सर्वजगत्प्रतिष्ठितमिदं रज्वां यथा हि भ्रमः
प्रज्ञानं प्रभुरामरूपमचलं तच्चिन्तये सिद्धये ॥ ११॥

यो भूमा सुखमद्धितीयमधुना जानीहि तत्त्वं बृहत्
तच्छ्रीरामपदात्मरूपमिति यत्सूक्ष्माच्च सूक्ष्मं परम् ।
श्रद्धत्स्वेति पुनश्च तत्त्वमसि भेराबू?रते श्रुतिर्नैकधा
ज्ञात्वा स्वल्पमिदं हि मर्त्यमिह यत्सत्यं भजे तत्पदम् ॥ १२॥

ब्रह्माग्रे यदवेदहं पुनरिदं तत्सर्वमेवाभवत्
नास्त्यस्मादपरं यतो जगदिदं ब्रह्मैव सर्वं खलु ।
तद्योऽबुध्यत सोऽभवत्तदपरं नासीत्स एवाद्वयः
ज्ञात्वा श्रीगुरुरामरूपमभयं चाश्रित्य धन्या वयम् ॥ १३॥

दशोऽपनिषदां सारं श्रीरामस्तवमुत्तमम् ।
यः पठेच्छ्रूणु याभक्त्या मुक्तिभाक्स भवेद्ध्रुवम् ॥

इति दशोपनिषत्सारश्रीरामभद्रस्तोत्रं सम्पूर्णम् ॥

Encoded and proofread by Sonali Upendra Dasare

*Dashopanishatsara ShrirAmabhadra Stotram*

pdf was typeset on November 22, 2022

Please send corrections to *sanskrit@cheerful.com*